शशिभूषणाः । काश्मीरादिह संप्राप्तं लिङ्गं विजयसंज्ञितम् । सदा विजयदं पुंसां विजयेशः समर्च्चनात् । ऊर्द्ध्वरेतास्त्रिदण्डायाः संप्राप्तोऽत्र स्वयंविभुः । कुष्माण्डकं गणाध्यक्षं पुरस्कृत्वा व्यवस्थितः । ऊर्द्ध्वां गतिमवाप्नोति वीक्षणादूर्द्ध्वरेतसः । ऊर्द्ध्वरेतसि ये भक्ता न हि तेषामधोगतिः । मण्डलेश्वरतः क्षेत्रा-ल्लिङ्गं श्रीकण्ठसंज्ञितम् । विनायकान्मुण्डसंज्ञादुत्तरस्यां दिशि स्थितम् । श्रीकण्ठस्य तु ये भक्ताः श्रीकण्ठा एव ते नराः । नेह श्रिया वियुज्यन्ते न परत्र कदाचन । छागलाण्डान्महातीर्थात् कपर्द्दीश्वरसंज्ञितः । पिशाचमोचने तीर्थे स्वयमाविरभूद्विभुः । कपर्द्दीशं समभ्यर्च्च्य न नरो निरयं व्रजेत् । न पिशाचत्वमाप्नोति कृत्वाऽत्राप्यघमुत्तमम् । आषाढ़केश्वरात् क्षेत्रात् लिङ्गं सूक्ष्मेशसंज्ञितम् । स्वयमभ्यागतं चात्र क्षेत्रे वै श्रेयसां पदे । विकटद्विजसंज्ञस्य गणेशस्य समीपतः । दृष्ट्वा लिङ्गेश्वरं लिङ्गं गतिं शुभामवाप्नुयात् । संप्राप्तमिह देवेशं जयन्तं मधुकेशवात् । लम्बोदराद्गणपतेः पुरस्तात्तदवस्थितम् । जयन्तेश्वरमालोक्य स्नात्वा गङ्गाजले शुभे । प्राप्नुयाद्वाञ्छितां सिद्धिं सर्व्वत्र विजयी भवेत् । प्रादुश्चकार देवेशः श्रीशैलात्त्रिपुरान्तकः श्रीशैलशिखरं दृष्ट्वा यत् फलं समुदीरितम् । त्रिपुरान्तकमालोक्य तत्फलं हेलयाप्यते । विश्वेशात् पश्चिमे भागे त्रिपुरान्तकमीश्वरम् । संपूज्य परया भक्त्या न नरो गर्भमाविशेत् । सोमस्थानादिहायातो भगवान् कुक्कुटेश्वरः । वक्रतुण्डगणाध्यक्षसमीपे सोऽवतिष्ठते । तद्दर्शनादर्च्चनाच्च करस्थाः सर्व्वसिद्धयः । जलेश्वरात्त्रिशूली च स्वयमीशः समागतः । एकदन्तोत्तरे भागे सोऽर्च्चितः सर्व्वकामदः । त्रिसन्ध्यात्क्षेत्रतो देवस्त्र्यम्बकोऽस्ति समागतः । त्रिमुखात् पूर्व्वदिग्भागे पूजितस्त्र्यम्बकत्वकृत् । हरेश्वरो हरिश्चन्द्रात्क्षेत्रादत्र समागतः । हरिश्चन्द्रेश्वरपुरः पूजितो जयदः सदा । इह सर्व्वः समायातः स्थानात् मध्यमकेश्वरात् । चतुर्व्वेदेश्वरं लिङ्गं पुरो वायव्यसंस्थितम् । सर्व्वलिङ्गं समभ्यर्च्च्य काश्यां परमसिद्धिकृत् । न जातु जन्तुपदवीं प्राप्नुयात् कापि मानवः । स्थलेश्वरान्महालिङ्गं प्रादुर्भूतं परन्त्विह । यत्र यज्ञेश्वरं लिङ्गं सर्व्वयज्ञफलप्रदम् । महालिङ्गं समभ्यर्च्च्य महाश्रद्धासमन्वितः । महतीं श्रियमाप्नोति लोकेऽत्र च परत्र च । इह लिङ्गं सहस्राख्यं सुवर्णाख्यात् समागतम् । यस्य संदर्शनात् पुंसां ज्ञानचक्षुः प्रजायते । शैलेश्वरादवाच्यान्तु सहस्राक्षेश्वरं विभुम् । दृष्ट्वा जन्मसहस्राणां शतानां पातकं त्यजेत् । हर्षिताद्धर्षितं चात्र प्रादुरासीत्तमोहरम् । लिङ्गं हर्षप्रदं पुंसां दर्शनात् स्पर्शनादपि । महेन्द्रेश्वरसमीपे तु प्रासादो हर्षितेशितुः । तद्विलोकनतः पुंसां नित्यं हर्षपरम्परा । इह स्वयं समायातो रुद्रो रुद्रमहालयात् । यस्य दर्शनतो यान्ति रुद्रलोके नराः स्फुटम् । यैस्तु रुद्रेश्वरं लिङ्गं काश्यामत्र समर्च्चितम् । ते रुद्ररूपिणो मर्त्या विज्ञेया नात्र संशयः । त्रिपुरेशसमीपे तु दृष्टा रुद्रेश्वरं विभुम् । रुद्रास्त एव विज्ञेया जीवन्तोऽपि मृता अपि । प्रयागादिह महादेवो वृषेशो वृषभध्वजात् । वाणेश्वरस्य लिङ्गस्य समीपे वृषदः सदा । इहागतं तु केदारादीशानेश्वरसंज्ञितम् । तत् द्रष्टव्यं प्रतीच्यां च लिङ्गं प्रह्लादकेश्वरात् । ईशानेशं समभ्यर्च्च्य स्नात्वा तु वरणाम्भसि । वसेदीशाननगर ईशानसदृशप्रभः । भैरवाद्भैरवीमूर्त्तिरत्रायाता मनोहरा । संहारभैरवो नाम द्रष्टव्यः स प्रयत्नतः । पूजनात् सर्व्वसिद्धौ स प्राच्यां खर्व्वविनायकात् । संहारभैरवः काश्यां संहरेदघसन्ततिम् । उग्रः कनखलात्तीर्थादाविरासीत् सुसिद्धिदः । तद्विलोकनतो नृणामुग्रं पापं विनश्यति । उग्रं लिङ्गं सदा सेव्यं प्राच्यां खर्व्वविनायकात् । अत्युग्रा अपि नश्यन्त्युरुपसर्गास्तदर्च्चनात् । वस्त्रापथान्महाक्षेत्राद्भवो नाम स्वयं विभुः । प्राच्यां दण्डीश्वरः पूज्यः सदेहलिविनायकात् । तस्यार्च्चनेन मर्त्यानां न पुनर्भव ईक्ष्यते । भीमचण्डीसमीपे तु प्रादुराशीदिह प्रभुः । भवेश्वरं समभ्यर्च्च्य भवे नाविर्भवेन्नरः । प्रभुर्भवति सर्व्वेषां राज्ञामाज्ञाकृतामिह । देवदारुवनाद्दण्डी दण्डयन् पातकावलीः । वाराणस्यां समागत्य स्थितो लिङ्गाकृतिर्भवः । प्राच्यां दण्डीश्वरः पूज्यः स देहलिविनायकात् । तस्यार्च्चनेन मर्त्यानां न पुनर्भव ईक्ष्यते । भद्रकर्णह्रदाद्दण्डो भद्रकर्णह्रदान्वितः । शिवः साक्षादिहायातः सर्व्वेषां शिवदोऽर्च्चितः । उद्दण्डाख्याद्गणपतेः प्राच्यां तत्तीर्थमुत्तमम् । भद्रकर्णह्रदे स्नात्वाऽभ्यर्च्च्य लिङ्गं शिवाह्वयम् । सर्व्वत्र शिवमाप्नोति भद्रं भवविनाशकम् । शृणुयात् सर्व्वभूतानां भद्रं पश्यति चाक्षिभिः । शङ्करस्य हरिश्चन्द्रात् त्वत्पुरः प्रतिभासते । तत्पूजनाज्जनानां न जननीजठरे जनिः । यमलिङ्गान्महातीर्थात् काललिङ्ग-